
अष्टमः पाठः

# तिरुक्कुरल्–सूक्ति–सौरभम्



( चेन्नईनगरस्य समुद्रतटः। तत्र तिरुवल्लुवरस्य प्रतिमां दृष्ट्वा छात्राः परस्परं चर्चां कुर्वन्ति। )

**शारदा** – नमिते! पश्य पश्य एतां प्रतिमाम्। मन्ये कोऽपि महाकविः।

**नमिता** – कथं मन्यसे?

**सङ्गीता** – किं न पश्यसि यत् अस्य हस्ते तु पुस्तकम् इव किञ्चित् विराजते।

**आदित्यः** – आम् आम्! किमपि लिखति सः।

**वैभवः** – ननु अत्रैव लिखितम्। एष खलु महाकविः तिरुवल्लुवरः इति।

**सौम्या** – अहो! एष एव महाकविः येन तिरुक्कुरल् इति महान् पावनः ग्रन्थः विरचितः।

**हार्दिकः** – आम्। मम जनकस्तु प्रतिदिनमेव अस्य पाठं करोति। तेन तु अधिकांशपद्यानि कण्ठस्थीकृतानि।

**अधोक्षजः** – अहो स्मरामि! अस्माकं संस्कृतपुस्तके तु अस्य एव ग्रन्थस्य कतिचित् पद्यानि संस्कृतभाषया अनूद्य प्रदत्तानि।

**सर्वे** – तर्हि अवश्यमेव पठिष्यामः तं पाठं ज्ञानवृद्धिं च करिष्यामः।

अष्टमः पाठः

# तिरुक्कुरल्-सूक्ति-सौरभम्



पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥ 1 ॥

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥ 2 ॥

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥ 3 ॥

विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥ 4 ॥

यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः ॥ 5 ॥

वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।
स केनापि प्रकारेण परैर्न परिभूयते ॥ 6 ॥

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥ 7 ॥

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥ 8 ॥

# शब्दार्थाः

| | | | |
|---|---|---|---|
| **अकातरः** (वि०) (पु०प्र०ए०व०) [न कातरः, नञ् त०पु०] | वीरः | साहसी, निर्भीक | bold, fearless. |
| **अभ्युदीरयेत्** (क्रि०) (प्र०पु०ए० व०) [अभि+उत्+ईर्+वि०लिङ्] | वदेत् | बोले | should utter, should pronounce, should proclaim. |
| **अवक्रता** (सं०) (स्त्री०प्र०ए०व०) [न वक्रता, नञ् त०पु०] | ऋजुता | सरलता | simplicity. |
| **ईरितः** (वि०) (पु०प्र०ए०व०) [ईर्+क्त] | कथितः, प्रेरितः | प्रेरित किया गया | said, inspired. |
| **क्लेशपरम्परा** (सं०) (स्त्री०प्र०ए०व०) [क्लेशानां परम्परा, ष०त०पु०] | कष्टसमूहः | अनेक कष्ट, दुःख | series of agonies. |
| **तथ्यतः** (अव्य०) [तथ्य+तसिल्] | यथार्थरूपेण | वास्तव में | in reality. |
| **तपः** (सं० तपस्) (नपुं०प्र०ए०व०) | तपस्या | साधना | Penance. |
| **तेपे** (क्रि०) (प्र०पु०ए०व०) [तप् (परस्मै०) लिट्] | तपस्या कृता | तपस्या की | underwent the austerities. |
| **धर्मप्रदाम्** (वि०) (स्त्री०द्वि०ए०व०) [धर्मं प्रददाति इति, उप०त०पु०] | धर्मयुक्ताम् (वाणीम्) | धर्मनिष्ठ वाणी को | righteous speech. |
| **परिभूयते** (क्रि०कर्म०वा०) (प्र०पु०ए०व०) [परि+भू+यक्+लट्] | तिरस्क्रियते | अपमानित किया जाता है | disrespected. |
| **परुषाम्** (वि०) (स्त्री०द्वि०ए०व०) [परुष+टाप्] | कठोराम् (वाचम्) | कठोर, रूखी (वाणी) को | harsh speech. |
| **भुङ्क्ते** (क्रि०) (प्र०पु०ए०व०) [भुज्+लट् (आ०)] | खादति | खाता है | eats. |
| **मन्त्री** (वि०) (पु०प्र०ए०व०) मूलशब्दः मन्त्रिन् | परामर्शदाता | परामर्श देने वाला | advisor, counsellor, minister. |
| **वाक्पटुः** (वि०) (पु०प्र०ए०व०) [वाचि पटुः, स०त०पु०] | सम्भाषणे कुशलः | सम्भाषण में कुशल | eloquent. |
| **वाचि** (सं० वाच्) (स्त्री०स०ए०व०) | वाण्याम् | वाणी में | in the speech. |
| **विमूढधीः** (वि०) (पु०प्र०ए०व०) [वि+मुह्+क्त इति विमूढ, विमूढा धीः यस्य सः, ब०व्री०] | मूर्खः, बुद्धिहीनः | मूर्ख, अज्ञानी | foolish, ignorant. |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| पिताऽस्य | = | पिता+अस्य | तपस्तेपे | = | तप:+तेपे |
| इत्युक्तिस्तत्कृतज्ञता | = | इति+उक्ति:+तत्कृतज्ञता | भवेद् यदि | = | भवेत्+यदि |
| तदेवाहु: | = | तत्+एव+आहु: | योऽभ्युदीरयेत् | = | य:+अभि+उदीरयेत् |
| भुङ्क्तेऽपक्वम् | = | भुङ्क्ते+अपक्वम् | लोकेऽस्मिन् | = | लोके+अस्मिन् |
| विद्वांस एव | = | विद्वांस:+एव | केनापि | = | केन+अपि |
| भवेद्येन | = | भवेत्+येन | शक्यो भवेत् | = | शक्य:+भवेत् |
| स विवेक इतीरित: | = | स:+विवेक:+इति+ईरित: | वापटुर्धैर्यवान् | = | वाक्पटु:+धैर्यवान् |
| अप्यकातर: | = | अपि+अकातर: | स केनापि | = | स:+केन+अपि |
| परैर्न | = | परै:+न | | | |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| य:+इच्छति+आत्मन: | = | य इच्छत्यात्मन: | कुर्यात्+अहितम् | = | कुर्यादहितम् |
| कदा+अपि | = | कदापि | प्रथम:+धर्म: | = | प्रथमो धर्म: |
| तस्मात्+रक्षेत् | = | तस्माद् रक्षेत् | इति+एतत्+विदुषाम् | = | इत्येद् विदुषाम् |
| सत्+आचारम् | = | सदाचारम् | प्राणेभ्य:+अपि | = | प्राणेभ्योऽपि |

## संयोग:

| | | | | | |
|---|---|---|---|---|---|
| तत्कृतज्ञता | = | तत्+कृतज्ञता | समत्वमिति | = | समत्वम्+इति |
| सभायामपि | = | सभायाम्+अपि | | | |

# अभ्यास:

1. **प्रश्नानाम् उत्तरम् एकपदेन लिखत-**

(क) पिता पुत्राय बाल्ये किं यच्छति?

(ख) मूढमति: कीदृशीं वाचं परित्यजति?

(ग) अस्मिन् लोके के एव चक्षुष्मन्त: प्रकीर्तिता:?

(घ) नर: केन गुणेन कस्यापि कथनस्य तत्त्वार्थनिर्णयं कर्तुं शक्नोति?

(ङ) प्राणेभ्योऽपि किं रक्षणीयम्?

(च) आत्मन: श्रेय: इच्छन् नर: कीदृशं कर्म न कुर्यात्?

(छ) वाचि किं भवेत्?

(ज) पाठे 'वाचि पटु:' इति स्थाने किं पदं प्रयुक्तम्?

**2. अधोलिखितप्रश्नाम् उत्तराणि पूर्णवाक्येन लिखत –**

(क) पुत्र: पितरं प्रति किम् अनुभवेत्?

..............................................................................................................

(ख) आत्मन: हितम् इच्छन् नर: किं कुर्यात्?

..............................................................................................................

(ग) मूर्खबुद्धि: जन: कीदृशीं वाणीं त्यजति?

..............................................................................................................

(घ) विदुषां वच: किम्?

..............................................................................................................

(ङ) वस्तुत: लोके चक्षुष्मन्त: के कथिता:?

..............................................................................................................

(च) महात्मान: समत्वं किं कथयन्ति?

..............................................................................................................

(छ) विवेकी जन: कस्य तत्त्वार्थनिर्णयं कर्तुं शक्नोति?

..............................................................................................................

(ज) कीदृश: जन: परै: न तिरस्क्रियते?

..............................................................................................................

**3. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) **विमूढधी:** पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते।

(ख) संसारे विद्वांस: **ज्ञानचक्षुभि:** नेत्रवन्त: कथ्यन्ते। ....................................

(ग) जनकेन सुताय **शैशवे** विद्याधनं दीयते। ....................................

(घ) तत्त्वार्थस्य निर्णय: **विवेकेन** कर्तुं शक्यते। ....................................

(ङ) **साधूनां** चित्ते वाचि च सरलता भवति। ....................................

(च) **धैर्यवान्** लोके परिभवं न प्रप्नोति। ....................................

(छ) **आत्मकल्याणम्** इच्छन् नरः परेषाम् अनिष्टं न कुर्यात्। ....................................

## 4. यथानिर्देशम् उत्तरत –

(क) 'भुङ्क्ते' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?

(ख) 'परुषाम्' इति विशेषणस्य किं विशेष्यपदं पाठे प्रयुक्तम्?

(ग) 'अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।' अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम्?

(घ) 'य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।' इत्यस्मिन् वाक्ये 'कल्याणम्' इति पदस्य किं पर्यायपदं प्रयुक्तम्?

(ङ) 'अल्पानि' इति पदस्य किं विलोमपदं पाठे प्रयुक्तम्?

## 5. अधोलिखितानां शब्दानां पुरतः उचितं विलोमशब्दं कोष्ठकात् चित्वा लिखत –

| | शब्दः | विलोमशब्दः | |
|---|---|---|---|
| (क) | कृतज्ञता | ................................ | (कृपणता, कृतघ्नता, कातरता) |
| (ख) | पक्वः | ................................ | (परिपक्वः, अपक्वः, क्वथितः) |
| (ग) | परुषा | ................................ | (पौरुषी, कोमला, कठोरा) |
| (घ) | विमूढधीः | ................................ | (सुधीः, निधिः, मन्दधीः) |
| (ङ) | आलस्यम् | ................................ | (उद्विग्नता, विलासिता, उद्योगः) |
| (च) | कातरः | ................................ | (अकरुणः, अधीरः, अकातरः) |

## 6. अधोलिखितानां शब्दानां त्रयः समानार्थकाः शब्दाः शब्दमञ्जूषायाः चित्वा लिखत –

**शब्दमञ्जूषा**

| | | |
|---|---|---|
| वदनम् | नयनम् | चेतः |
| मनः | कल्याणम् | बहु |
| संसद् | भूरि | नेत्रम् |
| लोचनम् | वक्त्रम् | समितिः |
| शुभम् | मानसम् | शिवम् |
| आननम् | विपुलम् | परिषद् |

(क) चित्तम् .................... .................... ....................

(ख) मुखम् .................... .................... ....................

(ग) प्रभूतम् .................... .................... ....................

(घ) चक्षुः .................... .................... ....................

(ङ) सभा .................... .................... ....................

(च) श्रेयः .................... .................... ....................

**7. पाठात् विचित्य समुचितैः विशेषणपदैः रिक्तस्थानानि पूरयत–**

(क) .................... .................... .................... मन्त्री परैः न परिभूयते।

(ख) बुद्धिमान् सदा .................... एव वाचं वदति।

(ग) यः सुखानि इच्छति सः .................... कर्म त्यजेत्।

(घ) पुत्रः शैशवे पितुः .................... विद्याधनं प्राप्नोति।

(ङ) .................... .................... आचारः इति विद्वांसः मन्यन्ते।

**8. पाठात् चित्वा अधोलिखितपद्यांशानां भावम् उपयुक्तपदैः पूरयत –**

(क) चित्ते वाचि च सरलता महात्मभिः .................... मन्यते।

(ख) पिता पुत्राय विद्यादानार्थं महत् कष्टं सहते। पुत्रेण अस्य अनुभूतिः एव .................... कथ्यते।

(ग) .................... एव धर्मप्रदां वाचं त्यक्त्वा .................... वाचं वदति।

(घ) अस्मिन् संसारे केवलं .................... एव .................... मन्तव्याः।

(ङ) प्रत्येकं कथनस्य .................... येन क्रियते सः .................... अस्ति।

(च) यः मन्त्री (परामर्शदाता) तु .................... .................... .................... भवति स अन्यैः कदापि न तिरस्क्रियते।

**9. पाठात् चित्वा अधोलिखितानां श्लोकानाम् अन्वयम् उचितपदक्रमेण पूरयत –**

(क) पिता पुत्राय बाल्ये महत् .................... यच्छति, अस्य पिता किम् .................... तेपे, इत्युक्तिः .................... ।

(ख) येन केनापि यत् .................... तस्य तत्त्वार्थनिर्णयः येन .................... शक्यः भवेत्, सः .................... इति ईरितः।

(ग) य आत्मनः श्रेयः .................... सुखानि च इच्छति, सः परेभ्यः अहितम् .................... कदापि च न .................... ।

**10. मञ्जूषायाः तद्भावात्मकसूक्तीः विचित्य अधोलिखितकथनानां समक्षं लिखत -**

(क) विद्याधनं महत्

..........................................................................................

..........................................................................................

(ख) आचारः प्रथमो धर्मः

..........................................................................................

..........................................................................................

(ग) चित्ते वाचि च अवक्रता एव समत्वम्

..........................................................................................

..........................................................................................

**मञ्जूषायाः सूक्तयः**

आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत्।
मनसि एकं वचसि एकं कर्मणि एकं महात्मनाम्।
विद्याधनं सर्वधनप्रधानम्।
सं वो मनांसि जानताम्।
विद्याधनं श्रेष्ठं तन्मूलमितरद्धनम्।
आचारप्रभवो धर्मः सन्तश्चाचारलक्षणाः।

**11. अधस्ताद् समासविग्रहाः दीयन्ते तेषां समस्तपदानि पाठाधारेण दीयन्ताम्-**

| | विग्रहः | समस्तपदम् | समासनाम |
|---|---|---|---|
| (क) | तत्त्वार्थस्य निर्णयः | .................................. | षष्ठी तत्पुरुषः |
| (ख) | वाचि पटुः | .................................. | सप्तमी तत्पुरुषः |
| (ग) | धर्मं प्रददाति इति (ताम्) | .................................. | उपपदतत्पुरुषः |
| (घ) | न कातरः | .................................. | नञ् तत्पुरुषः |
| (ङ) | न हितम् | .................................. | नञ् तत्पुरुषः |

(च) महान् आत्मा येषाम् ते ................................ बहुव्रीहिः

(च) विमूढा धीः यस्य सः ................................ बहुव्रीहिः

**12. अधोलिखितेषु भिन्नप्रकृतिकं शब्दं रेखाङ्कितं कुरुत–**

(क) तपः, धर्मः, श्रेयः, वचः। (लिङ्गकारणात्)

(ख) तथ्यतः, विशेषतः, मुख्यतः, ईरितः। (प्रत्ययकारणात्)

(ग) लघुता, प्रकीर्तिता, अवक्रता, कृतज्ञता (प्रत्ययकारणात्)

(घ) लोके, चित्ते, वाचि, भुङ्क्ते। (विभक्तिकारणात्)

**13. अधोलिखितवाक्येषु स्थूलाक्षरपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत –**

(क) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

(i) श्रेष्ठः (ii) कल्याणम् (iii) सम्पत्तिम्

(ख) तदैव आहुः महात्मानः समत्वमिति तथ्यतः।

(i) कथयन्ति (ii) शृण्वन्ति (iii) चिन्तयन्ति

(ग) वाक्पटुः धैर्यवान् मन्त्री सभायामप्यकातरः परैः न परिभूयते।

(i) निपुणः (ii) उत्तमः श्रोता (iii) वाक्कुशलः

(घ) त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।

(i) कठोराम् (ii) कोमलाम् (iii) प्रयुक्ताम्

(ङ) स विवेक इति ईरितः।

(i) दृष्टः (ii) कथितः (iii) श्रुतः

## अन्वयः

1. पिता पुत्राय बाल्ये महत् विद्याधनम् यच्छति। अस्य (पुत्रस्य) पिता किम् तपः तेपे इति उक्तिः तत्कृतज्ञता।
2. यथा अवक्रता चित्ते तथा यदि वाचि भवेत्, महात्मानः तथ्यतः तदेव समत्वम् इति आहुः।
3. यः धर्मप्रदाम् वाचम् त्यक्त्वा परुषाम् (वाचम्) अभ्युदीरयेत्। (सः) विमूढधीः पक्वम् फलम् परित्यज्य अपक्वम् (फलम्) भुङ्क्ते।
4. अस्मिन् लोके विद्वांसः एव चक्षुष्मन्तः प्रकीर्तिताः। अन्येषाम् वदने ये (चक्षुषी) ते तु चक्षुर्नामनी मते।
5. येन केन अपि यत् प्रोक्तम् तस्य तत्त्वार्थनिर्णयः येन कर्तुम् शक्यः भवेत्, सः विवेकः इति ईरितः।
6. (यः) मन्त्री वाक्पटुः, धैर्यवान्, सभायाम् अपि अकातरः (अस्ति) सः परैः केन अपि प्रकारेण न परिभूयते।
7. यः आत्मनः श्रेयः प्रभूतानि सुखानि च इच्छति, सः परेभ्यः अहितम् कर्म कदापि न कुर्यात्।
8. आचारः प्रथमः धर्मः इति एतत् विदुषाम् वचः, तस्मात् प्राणेभ्यः अपि सदाचारम् विशेषतः रक्षेत्।

# योग्यताविस्तारः

**( न परीक्षाकृते )**

**( क ) 'तिरुक्कुरल् - सूक्तिसौरभम्' इति पाठस्य तमिळ मूलपाठः ( देवनागरी लिपौ )**

सोर्कोट्टम् इल्लदु सेप्पुम् ओरू तलैया उहळूकोट्टम् इन्मै पेरिन्।
मगन् तन्दैक्काट्रुम् उद्रवि इवन् तन्दै एन्नोट्रान् कौमू एन्नुम् सोक्त।
इनिय उळवाग इन्नाद कूरल् कनि इरूप्पक् काय् कवरंदट्र।
कण्णुडैयर् एन्पवर् कट्रोर मुहत्तिरण्डु पुण्णुडैयर कल्लादवर्।
एप्पोरूल यार यार केट्रपिनुम् अप्पोरूल मेय् पोरूल काण्पदरिवु।
सोललवल्लन् सोरविलन् अन्जान् अवनै इहलवेल्लल् यारुक्कुम् अरितु।
नोय एल्लाम् नोय् सेयदार मेलवाम् नोय् सेययार नोय् इन्मै वेण्डुभवर्।
ओषुक्कम् विषुप्पम् तरलान् ओषुक्कम् उयिरिनुम् ओम्भप्पडुम्।

**( ख ) ग्रन्थपरिचयः**

तिरुक्कुरल् तमिलभाषायां रचिता तमिलसाहित्यस्य उत्कृष्टा कृतिः अस्ति। अस्य प्रणेता तिरुवल्लुवरः अस्ति।

ग्रन्थस्य रचनाकालः अस्ति-ईशवीयाब्दस्य प्रथमशताब्दी।

अस्मिन् ग्रन्थे सकलमानवजातेः कृते जीवनोपयोगि सत्यं प्रतिपादितम्।

तिरु शब्दः 'श्री' वाचकः। 'तिरुक्कुरल्' पदस्य अभिप्रायः अस्ति श्रिया युक्तं कुरल् छन्दः अथवा श्रिया युक्ता वाणी।

अस्मिन् ग्रन्थे धर्म-अर्थ-काम-संज्ञकाः त्रयः भागाः सन्ति। त्रयाणां पद्यसंख्या 1330 अस्ति।

**( ग ) भावविस्तारः**

**सदाचारः**

किं कुलेन विशालेन शीलमेवात्र कारणम्।
कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु॥
आगमानां हि सर्वेषामाचारः श्रेष्ठ उच्यते।
आचारप्रभवो धर्मो धर्मादायुर्विवर्धते॥

**विद्याधनम्**

विद्याधनं धनं श्रेष्ठं तन्मूलमितरद्धनम्।
दानेन वर्धते नित्यं न भाराय न नीयते।
माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा॥

## मधुरा वाक्

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता॥
वाणी रसवती यस्य यस्य श्रमवती क्रिया।
लक्ष्मीः दानवती यस्य सफलं तस्य जीवितम्।

## विद्वांसः

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति॥
विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

## प्रहेलिका

**कं सञ्जघान कृष्णः का शीतलवाहिनी गङ्गा।**
**के दारपोषणरताः कं बलवन्तं न बाधते शीतम्॥**

## एहि हसाम

कश्चन ग्रामीणः नेत्रपरीक्षणार्थं नेत्रवैद्यसमीपं गतः। वैद्यः तं सम्यक् परीक्ष्य – ''उपनेत्रं धर्तव्यं भवता। तदा दृष्टिशक्तिः सम्यक् भविष्यति ततः पठनादिषु न क्लेशः'' इति अवदत्।

''उपनेत्रधारणाद् अनन्तरं किम् अहं पठितुम् अपि शक्नुयाम्?'' इति साश्चर्यम् अपृच्छत् ग्रामीणः।

''आम्, निश्चयेन। तत्र सन्देहः एव नास्ति'' – वैद्यः अवदत्।

तदा ग्रामीणः अवदत् – ''धन्यवादाः! महते उपकाराय एतत्। मया इतः पूर्वम् अक्षराभ्यासः अपि न कृतः आसीत्। इतः परं तु अक्षराभ्यासं विनैव पठनसामर्थ्यं भवेत् मम।''